प्रश्न - पेपर 67 गुणाङ्का: शतम्

'श्री सिद्धहेमशब्दानुशासनम्' 'आद्यत्रय: पादा:'

प्र. १ A निम्नालिखितभावप्रदर्शक - सूत्रम् सवृत्तिकम् लिख्यताम् । कानिचित् षट् 15 मार्क्स

(1) मस्य र् विधायकम् ।

(२) जिह्वामूलीय संज्ञादर्शकम् ।

(3) ऋकारस्य विलक्षणऋ कारकम् ।

(4) ह्रस्वस्य विधानम् कुर्वत्

(5) रकारस्य उपध्मानीय विदधत् ।

(6) हकारात् परस्यवर्णस्य द्वित्वम् कुर्वाणम् ।

(7) एकस्वारि सूत्रम् ।

[B] अधोलीखित पदप्रदर्शक सूत्रस्य सान्धिम् विमुच्य अर्थो लिख्यताम् । केषाञ्चित् षट् 15 मार्क्स

(1) अनुत्रि (२) असषे (3) दश (4) न: (5) अपदे

(6) कादि: (7) अर्

प्र. २ निम्नोक्त प्रश्नानामुत्तराणी दीयन्ता:, कान्यपि नव 27 मार्क्स

(1) एतदश्च व्यञ्जने। ।।3।46 सूत्रे अक् वर्जनम् किमर्थम् ? तद् बोधयित्वा ऋत्यारूप। ।।२।७ सूत्रे आर् ग्रहणम् किन्निमित्तम् ?

(२) तदन्तम् पदम् १।१।२० सूत्रे अन्तग्रहणस्य किम् प्रयोजनम् ? इति ज्ञापयित्वा समानानाम् १।२।१ सूत्रे बहुवचनम् किमर्थम् ?

(3) ङ्णो: कटावन्तौ १।3।१7 सूत्रत: प्रादुर्भूतो वा इत्यधिकार: कुत्र कथम् निवृत्तस्तदवगम्य ऐदौत्। १।२।१२ सूत्रे बहुवचनम् किम् कारणम् ?

(4) पदान्ताट्टवर्गाद्। १।3।63 सूत्रे आम् प्रत्ययस्य नामादेशवर्जनम् कथम् भवेद् ? तद् गमयित्वा 'अन्यो घोषवान् १।१।१4 सूत्रम् किमर्थम् ?

(5) ङ्णो: कटावन्तौ १।3।१7 सूत्रे अन्तग्रहणम् किम् प्रयोजनम् ? अवबोध्य प्रस्यैषैष्यो। १।२।१4 सूत्रम् किन्निमित्तम् ?

(6) र्हादर्हस्वरस्य। १।3।3१ सूत्रस्थ: अनुशब्द: किम् बोधयतीति विज्ञाप्य 'लिलौ' १।3।65 सूत्रे द्विवचनम् किमर्थम् ?

(7) 'मधु अत्र' इति प्रयोगे ह्रस्वस्य ह्रस्वत्वम् कथम् क्रियेत ? तज्ज्ञापयित्वा अनवर्णा नामी १।१।6 इति सूत्रे वचनविपर्यास: कथम् ?

(8) अव्ययसंज्ञकानि सूत्राणि कानि कानि ? तान्यवबोध्य 'नृनः पेषु वा' १।3।१० सूत्रे बहुवचनम् किन्निमित्तम् ?

(9) 'क्रुङ्ङ्वास्ते' इति प्रयोगम् साद्यन्त: सिद्धया सह घटयित्वा सान्धि: कुत्र भवतीति बोध्यताम् ?

(१०) प्रथमपादे आगताः संज्ञाः ससूत्रा लिखित्वा अ॰ अः ञक ४प॰ १।१।१७ सूत्रे बहुवचनम् किम् प्रयोजनम् ?

प्र॰ ३ निम्नसूचित न्यायानाम् घटना सुक्रियताम् । काश्चित्तिस्रः — १२½ मार्क्स

(१) कृत्रिमाऽकृत्रिमयोः॰ ।

(२) येन धातुना उक्ताः प्रादयस्तमेव प्रत्युपसर्गसंज्ञा ।

(३) आसिद्धम् वहिरङ्गमन्तरङ्गे ।

(४) दन्त्योपदिष्टम् कार्यम् तालव्यस्यापि --- ।

प्र॰ ४ अधः कथितप्रयोगाणाम् सिद्धिस्साधन्ता क्रियताम् । काश्चन पञ्च — १५ मार्क्स

(१) षण्णाम् (२) उदवोढाम् (३) उपेकीयति (४) अमुमुईचा

(५) पित्र्यम् (६) वृक्षव (करोति)

प्र॰ ५ A अपूर्णसेत्रस्य पूर्णप्रेम्णा पूर्णताम् कुर्वताम् । — ७½ मार्क्स

(१) तृतीयस्य पञ्चमे १।३।१ इति सूत्रे —— सूत्रतः —— इत्येतस्य, —— सूत्रेण —— इत्येतस्य, —— सूत्रात् —— इत्येतस्य च आधिकारो वर्तते ।

(२) प्रशान् + शेते इति प्रयोगस्य सन्धयः — — — — भवन्ति ।

(३) स्पर्शयतीति घष्रान्ते —— सूत्रतः शकारद्वित्वस्य प्राप्तिः —— सूत्रेण प्रतिषिद्धा।

(४) त्रिपादमध्ये आगतानि निपातसूत्राणि —— —— ——

(५) धनुः स्फालयतीत्येतस्य —— सूत्रेण —— भूत्वा —— सान्धिः स्यात्

[B] अधस्सूचितशब्दानाम् व्याख्या लिख्यताम् । काश्चन तिस्रः — ६ मार्क्स

(१) अव्ययम् (२) वाक्यम् (३) अनियोगः (४) असत्त्वम्

२½ गुणाङ्काः अक्षरशुद्ध्यर्थाः